## ।। अथ अष्टपञ्चाशत्तमोऽध्याय: ।। Chapter-58

वसिष्ठ उवाच:- ततो गच्छेन्नृपश्रेष्ठ दिव्यरूपं[1] विनायकम् ।।
गौवत्सलमितिख्यातं सिद्धिदं भुवि देहिनाम् ।। १

पुरा प्रभावती नाम गन्धर्वतनया नृप[2]
तपस्यन्तं मुनिं प्राप्ता दमनं हृदि बिभ्रती ।। २

अनूर्ध्वसागरस्यान्ते मनोज्ञे कदलीवने ।।
मनोभवशरार्ता सा तमुवाच तपोनिधिम् ।। ३

प्रभावत्युवाच :- मुने मुञ्च तप: शीघ्रं कामिनी कामयस्व मां ।।
दह्यमानां परित्राहि सततं मदनाग्निना ।। ४

दमनउवाच :- वयं महर्षयो दान्ता भद्रे तपसि निश्चिता: ।।
जार्णोकसौख्यलोभेन हर्षयाम: कथञ्चन[3] ? ।। ५

प्रभावत्युवाच :- कुलमस्माकमुद्विग्नं[4] कामेन सततं मुने ।।
जानासि तत्कथं ब्रह्मन्निर्णयाय व्यवस्यति ।। ६

दमनउवाच[5] :- ~~वयं महर्षयो दान्ता भद्रे तपसि निश्चिता:~~
यदिगच्छन्ति ते प्राणा:स्मरार्तया: सुलोचने
तत: पुण्या: प्रतीक्षस्व यज्ञिया: षड्निशा[6] मम ।। ७

-०-

१ बी दिव्यरूप
२ ग्री दमन
३ बी जार्णोकसौख्यलाभे न दूषयाम: स्वकं वपु: ग्री पूषयाम: कथतं:
४ बी कुलमस्माकमुद्रिक्तं
५ बी मदनउवाच
६ बी यज्ञे वैषाण्णिशा

प्रभावत्युवाच :- स्थातुं मुने न शक्नोमि रात्रीमेका मपि क्वचित् ।।
अधुनैव मया सार्धिसगमं कुरु वै द्विज ।। ८

वसिष्ठ उवाच :- इत्युक्त्वा दमनं राजन् गन्धर्वी मदनातुरा ।
परिष्वक्तु मना: पार्श्वे गृहीतुमुपचक्रमे ।। ९

अथ क्रुद्धो मुनिर्यज्वा स्पर्शादेव शशाप ताम् ।।
व्याघ्री भविष्यसी त्युक्त्वा गन्धर्वी साप्यकम्पत ।। १०

उवाच चैनं शोकार्त्ता प्रसीदेति पुन: पुन: ।। ११

दमन उवाच :- शापान्तो भविता शीघ्रं तव गन्धर्वनन्दिनि ।।
हनिष्यसे गणेशेन स्कन्धे परशुना ध्रुवम् ।। १२

वसिष्ठ उवाच :- इत्युक्तमात्रे मुनिना व्याघ्री भूता प्रभावती ।।
करालदंष्ट्रा क्रूराक्षी मांसशोणितभोजना ।। १३

कुर्वती भीषणा न्नादान् भक्षयन्ती मृगा न्बहून् ।।
वनाद्वनं परिभ्राम्य प्राप्ता श्रीमाल सीमनि ।। १४

-०-०-

१ ए-बी- मया
२ बी पार्श्वे गृहीतुम् पचक्रमे
घ ई परिष्वज्य मुनि पार्श्वे
३ ए क्रुधो
४ ए समिनि
५ ए गद्धर्वी साप्यकम्पत
६ ए परसुना ।

दृष्ट्वा व यूथानि धेनूनां ब्राह्मणानां विनिर्जनम् ।।
पर्यधाव त्सुसंक्रुद्धा क्षुधार्ता क्रूरदर्शना ।। १५

ततो गाव: परित्रेसु: कम्पमाना भयार्दिता: ।।
पुच्छानि पृष्ठमारोप्य अर्धा[1]लीढतृणानना: ।। १६

व्योममार्गगतो देवस्तदा श्रीमालमा व्रजन् ।।
व्याघ्रीं तामभिधावन्ती ददर्श[2] द्विरदानन: ।। १७

तत: परशुमाक्षिप्य कंठे तामवधीद् बलात् ।।
हतमात्रा तु सासद्य: शापान्मुक्ता प्रभावती ।। १८

रूपेणाप्रतिमा लोके जाता गन्धर्व कन्यका ।।
तां विलोक्याथ भगवान् त्यक्तव्याघ्रतनु नृप ।। १९

उवाच विस्मयाविष्ट: पृथुनेत्रां[3] विनायक: ।। २०

विघ्नराजउवाच:- तुष्टोऽस्मि तव चार्वांगि वरं वरय मा चिरम् ।।
देवानां दर्शनं लोके न मोघं स्यात्कदाचन ।। २१

-o-

१ बी-उघ्वालिढ

३ बी- पृथुनेत्रौ

१ ए- अर्धालीढदतृणा

२ ए- ददर्शा

प्रभावत्युवाच :- अवतारमिह स्वामिन् कुरु देव विनायक ।।
श्रीमालेऽत्र स्थितिं देव कुरु मे प्रार्थनेन हि[1] ।। २२

अत्र क्षेत्रे स्थितं ये त्वामर्चयन्ति शरीरिणः ।।
तेभ्यः सिद्धिस्त्वया देया साधकेभ्यः सदा प्रभो ।। २३

विनायक उवाचः- येऽर्चयिष्यन्ति[2] मामत्र स्थितं मर्त्याः प्रभावति ।।
न तेषां विपदो जातु संपदस्तु पदे पदे ।। २४

वात्सल्यमिह धेनूनां रक्षणा द्विहितं मया ।।
तस्मा द्वोवत्स लो नाम्ना वत्स्यामीह पुरे[2 ए] शुभे ।। २५

चतुर्थीवासरे स्नात्वा ये नमिष्यन्ति मामिह ।।
राजसूयफलं तेषां तुष्टो दास्यामि सुन्दरि ।। २६

त्रैलोक्यवन्दितः श्रीमान् पतिस्तव भविष्यति ।।
पुत्रश्चभुवि साम्राज्यं लप्स्यते नात्र संशयः ।। २७

वशिष्ठ उवाच :- इत्युक्त्वान्तर्हितो देवः कृत्वा तत्रांशतः स्थितिम् ।।
प्रभावती च शिखरं शिवस्याद्रेः समभ्ययात् ।। २८

-०-०-

१ बी श्रीमाले त्र स्थितिं (तं) ये त्वामर्च्चयिष्यन्ति मानवाः
घ अर्चयन्ति शरीरिणः
१ ए हणु रे २ ए येर्चयन्ति

इत्थमासीन् महीपाल श्रीमाले गणनायक: ।।
गोवत्सल इति ख्यातो दर्शनादेव सिद्धिद: ।। २६

एतन् माहात्म्यमतुलं श्रद्धायुक्त: शृणोति य: ।।
कर्मारम्भेषु सर्वेषु तस्य विघ्नं न जायते ।। ३०

इति श्री स्कन्दपुराणे एकाशीतिसाहस्त्र्यांसंहितायां ब्राह्मविभागेतृतीय परिच्छेद श्रीमालमाहात्म्येगोवत्सलमाहात्म्यन्नामअष्टपञ्चाशत्तमोऽध्याय: ।। ५८ ।।

-o-